Postal Regd.No. GAMC- 1553/2022-2024 ISSN 2454-6313

संस्कृत-साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकीपत्रिका)
वर्ष : १६ अङ्क : १८८
जान्युआरी - २०२२

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2022-2024 issued by SSP Ahmedabad. Valid upto 31-12-2024. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### सज्जनाः ! क्षम्यताम्

काचित् युवती श्रीमद्भगवद्गीतायां महतीं प्रीतिं धारयति । तस्याः बहुत्र प्रवचनानि अपि आयोज्यन्ते । कदाचित् मया तस्याः प्रवचनस्य प्रशंसा कृता। सा पुलकिता अभवत्। एषा प्रक्रिया प्राकृतिकी अस्ति। मया कृतं सत्कर्म कोऽपि बहु मन्येत इति भावना यस्य हृदये न वर्तते सः मूढः भवति अथवा योगी भवति । ऋजुतया कृतं प्रशंसापानं किमपि दुष्कर्म नास्ति। अतः तत् निन्दार्हं नास्ति।

परन्तु एतादृशं वर्तनं केचन जनाः क्षन्तुं न शक्नुवन्ति। यथा हि समाजे बहवः जनाः भोजनप्रियाः वर्तन्ते। ते स्वादुभोजनं प्राप्तुं सर्वविधां युक्तिं कुर्वन्ति। कुत्रचित् तिरस्कारम् अपि सहन्ते। सामाजिकेषु कार्यक्रमेषु ते पाककार्येषु प्रसक्ताः दृश्यन्ते। अयं कोऽपि महान् अपराधः नास्ति। कस्यापि हानिः नास्ति चेत् तेषां तत् जिह्वालौल्यं क्षन्तव्यम् उदारहृदयेन।

केचन पुरुषाः स्त्रियं प्रति शीघ्रमेव आकृष्टाः भवन्ति । परिणामतः ते अपरिचितानां स्त्रीणाम् अपि साहाय्ये नितरां तत्पराः भवन्ति । तत्र स्त्रीणां लाभः अस्ति एव, ततोऽधिका परितृप्तिः पुरुषाणां भवति । अस्मिन् माङ्गलिके कर्मणि उभयपक्षे लाभः चेत् वयं किमर्थं वृथा पुरोभागाः भवेम ? परन्तु अधीरः मनुष्यः तत् आकर्षणं सोढुं क्षन्तुं वा न शक्नोति।

काचित् युवती केनचित् विश्वस्तेन युवकेन सह सकृत् सम्बन्धं कृत्वा स्वीयं शारीरं कुतूहलं पूरयति । तां युवतीं जनाः भृशं निन्दन्ति। क्वचित् तस्याः जीवनम् अपि नश्यति। अहं पृच्छामि यत् एवम्प्रकारेण कदाचित् कृतेन कर्मणा सा युवती भ्रष्टा अभवत्? न हि। भद्रेण समाजेन तत् कर्म क्षन्तव्यम्।

भवन्तः अपि बहुत्र पश्येयुः एव। क्वचित् अप्रणतं शिष्यं प्रति गुरुः खिद्यते। भोजनकाले पतिं प्रतीक्षमाणा पत्नी कुप्यति । शाके लवणम् अधिकं चेत् पतिः कुप्यति । क्रीडनकं भग्नं चेत् माता तर्जयते । कोऽपि जल्पति चेत् विरोधः, तूष्णीम् उपविशति चेत् निन्दा।

वयं मनुष्याः स्मः । अतः मानुषान् दोषान् वयं करिष्यामः एव । समाजे नितरां निर्दुष्टाः सज्जनाः क्षमां कुर्वन्तु!

## अराजकता

**जातककथा**

ब्रह्मदत्तः यदा काशीराज्यं पालयन् आसीत् तदा उत्तरपाञ्चालदेशं पाञ्चालः नाम राजा पालयति स्म। काम्पिल्यं तस्य राजधानी आसीत्। राजा पाञ्चालः भोगैकासक्तः चरित्रहीनः च आसीत्। अतः तस्य सर्वे मन्त्रिणः अपि अनैतिकव्यवहारे प्रवृत्ताः आसन्। जनानां कष्टं दिने दिने वर्धमानम् आसीत्। समग्रे उत्तरपाञ्चालदेशे अराजकता दृश्यते स्म।

जनानां जीवनं नितरां दुःखमयं जातम् आसीत्। दिने राजभटानां पीडा, रात्रौ चोराणां भीतिः। अतः नगरवासिनः गृहं कीलयित्वा द्वारस्य पुरतः कण्टकगुल्मं स्थापयित्वा पत्नी-पुत्रादिभिः सह अरण्यं गच्छन्ति स्म। समग्रं दिनम् अरण्ये यापयित्वा मध्यरात्रसमये गृहं प्रत्यागच्छन्ति स्म ते।

तेषु एव दिनेषु बोधिसत्त्वः नगरसीमायां स्थितस्य तिन्दुकवृक्षस्य अधिष्ठातृदेवतारूपेण जन्म प्राप्तवान्। राजा प्रतिवर्षं तस्य वृक्षस्य पूजां करोति स्म। तदर्थं सः सहस्रं मुद्राः व्ययीकरोति स्म।

तिन्दुकदेवः कदाचित् अचिन्तयत् – 'एषः राजा श्रद्धया भक्त्या च मम पूजां करोति। किन्तु एषः अदूरदर्शितायाः अविवेकस्य च कारणतः अराजकताकारणं जातः अस्ति। मत्तः ऋते एतम् उपदेष्टुं नार्हति अन्यः कोऽपि' इति।

अथ कदाचित् तिन्दुकदेवः राज्ञः स्वप्ने प्रत्यक्षीभूय अवदत् – ''राजन्! अहम् अस्मि तिन्दुकदेवः। भवन्तम् उपदेष्टुम् अहम् अत्र उपस्थितः अस्मि'' इति।

''भवता इष्टः सः उपदेशः कः?'' इति विनयेन अपृच्छत् राजा।

''राजन्! शासनकार्ये आसक्तिः नास्ति भवतः। एतस्य कारणतः भवतः देशः सर्वनाशदशां गतः अस्ति। यः राजा शासनव्यवहारे अनासक्तिं दर्शयति सः इहलोके राज्यात् वञ्चितः भवति, परलोके च नरकं प्राप्स्यति'' इति।

''देव! एतदर्थम् इदानीं मया किं वा करणीयम्?'' इति अपृच्छत् राजा।

''इदानीम् अपि न हि कालः अतीतः। राज्यकार्ये स्वयम् आसक्तिम् ऊढ्वा भवान् देशे अराजकतां दूरीकरोतु, स्वस्य राज्यस्य रक्षणं करोतु च'' इति बोधयित्वा तिन्दुकदेवः अदृश्यतां गतः।

एतस्मात् राज्ञः ज्ञानोदयः जातः। अतः सः निश्चितवान् यत् राज्यस्य स्थितिः स्वयं द्रष्टव्या इति। अनन्तरदिने सः मन्त्रिणः आहूय– ''भवद्भिः कानिचन दिनानि राज्यभारनिर्वहणं करणीयम्'' इति आदिश्य राजपुरोहितेन सह पूर्वद्वारेण निर्गतवान् छद्मवेषं धृत्वा।

नगरात् बहिः कस्यचित् गृहस्य पुरतः कश्चन वृद्धः दृष्टः ताभ्याम्। सः वृद्धः द्वारं पिधाय कीलयित्वा गृहं परितः कण्टकयुक्तान् गुल्मदण्डान् प्रसारितवान्। ततः पत्न्या पुत्रैः च सह अरण्यं प्रति गतवान् च। सायं गृहं प्रत्यागतः सः द्वारस्य उद्घाटनाय उद्युक्तः। तदवसरे किञ्चन कण्टकं पादे लग्नम्। तदा सः वेदनाम् अनुभवन् भूमौ उपविश्य कण्टकम् अपनयन् राजानम् अनिन्दत् – ''यथा मम पादे कण्टकं लग्नं तथैव पाञ्चालराज्यस्य शरीरे बाणाः लग्नाः भवन्तु युद्धावसरे'' इति।

एतत् श्रुत्वा राजपुरोहितः तस्य समीपं गत्वा अपृच्छत् – ''महाशय! भवान् तु वृद्धः। अतः एव भवतः दृष्टिः अतीक्ष्णा। तस्मात् पादे कण्टकं लग्नम्। अत्र राज्ञः कः वा अपराधः?'' इति।

''राजा अदक्षः इत्यतः अधिकारिणः दुष्टाः जाताः सन्ति। जनाः दिने राजोद्योगिनां पीडां, रात्रौ चोरभयं च

अनुभवन्ति। एतस्मात् मुक्तिं प्राप्तुं मार्गान्तरम् अजानन्तः ते गृहं परितः कण्टकानि प्रसार्य अरण्ये वासं कुर्वन्ति। यदि राजा सम्यक् स्यात् तर्हि कण्टकप्रसारः न अभविष्यत्, मम कण्टकवेधनम् अपि न स्यात्" इति अवदत् वृद्धः।

ततः राजा पुरोहितश्च अपरं ग्रामं गतवन्तौ। तत्र ताभ्यां काचित् गृहिणी दृष्टा। तस्याः द्वे पुत्र्यौ। उभे अपि विवाहयोग्ये। सा अरण्यं प्रति पुत्र्योः गमनं न इच्छति स्म, अतः एव सदापि पुत्र्यौ गृहे एव स्थापयित्वा काष्ठादिसङ्ग्रहाय स्वयं गच्छति स्म। पर्णसङ्ग्रहार्थं वृक्षम् आरूढा सा प्रमादवशात् ततः पतितवती। वेदनाम् अनुभवन्ती सा राजानम् अनिन्दत् – "एतस्य देशस्य राजा मरणं प्राप्नोतु नाम। यावत् सः जीवति तावत् मम पुत्र्योः विवाहः भवितुं न अर्हति" इति।

एतत् श्रुत्वा राजपुरोहितः तस्याः समीपं गत्वा अवदत् – "अये अविवेकिनि! राज्ये स्थितानां सर्वासां कन्यकानां कृते वराणां व्यवस्थापनं राज्ञः कार्यम् इति किं भवती चिन्तयति?" इति।

"वरान्वेषणं ममैव कार्यम्। किन्तु दिने राजभटेभ्यः, रात्रौ चोरेभ्यः च भीतिः। एतादृश्यां स्थितौ मम कन्ययोः कृते वरः कुतः प्राप्येत?" इति अवदत् सा गृहिणी।

राजा पुरोहितश्च ततः अग्रे गतवन्तौ। तत्र ताभ्यां क्षेत्रे कृषिं कुर्वन् कश्चन कृषिकः दृष्टः। कर्षणसमये स्खलनं प्राप्य कश्चन वृषभः अपतत्। तदा कृषिकः क्रोधेन अवदत् – "पाञ्चालदेशस्य राजा अपि एवमेव शूलेन विद्धः सन् यदि पतेत् तर्हि एव वयं सुखेन स्थातुं शक्नुयाम" इति।

राजपुरोहितः कृषिकस्य समीपं गत्वा अपृच्छत् – "मित्र! भवतः प्रमादात् वृषभः पतितः। अत्र राजा कथं दोषभाक् स्यात्?" इति।

"राजा एव दोषभाक् अत्र, न अन्यः। यदि राजा एव अदक्षः दुराचारः च स्यात् तर्हि अस्मादृशाः दुर्बलाः कथं जीवेयुः? दिने राजभटानां कारणतः, रात्रौ चोराणां कारणतः च आतङ्कः जागर्ति। पत्न्या मम निमित्तम् आनीतं पाथेयं दुष्टाः खादित्वा गतवन्तः। पत्न्या पुनः कदा भोजनम् आनीयेत इति अहं प्रतीक्षमाणः आसम्। अतः एव असावधानता आसीत् मम। तस्मात् मम वृषभः व्रणं प्राप्य अपतत्" इति उक्तवान् कृषिकः।

ततः पुरोहितः राजा च राजधानीं प्रति प्रस्थितवन्तौ। मध्येमार्गं ताभ्यां किञ्चन विलक्षणं दृश्यं दृष्टम्। कासारे निवसतः जीवन्मण्डूकान् काकाः गृहीत्वा खादन्तः ताभ्यां दृष्टाः। तदा मण्डूकाः राजानं निन्दन्तः अवदन् – "एते काकाः अस्मान् यथा पीडयन्ति तथैव शत्रवः अपि पाञ्चालराजं बहुधा पीडयन्तु" इति।

"अये मूर्खमण्डूक! भवतः पीडयन्ति काकाः। राज्ञा अत्र किम् अपराद्धम्? किमर्थं राजा निन्द्यते?" इति अपृच्छत् राजपुरोहितः।

"राज्ञः सन्तोषाय पुरोहितः भवान् यत् एतत् पृच्छन् अस्ति न अत्र आश्चर्यम्। देशे बलिश्राद्धादयः एव न प्रचलन्ति इत्यतः काकाः जीवतः अस्मान् एव खादन्तः सन्ति। एतादृश्याः स्थितेः कारणं राजा एव। अतः तस्य मरणम् एव वरम्" इति अवदत् मण्डूकः।

एतत् श्रुत्वा राजा पुरोहितम् अवदत् – "क्षुद्रः जन्तुः मण्डूकः अपि मां निन्दति। एषा स्थितिः अवश्यं परिवर्तनीया। राजधानीं प्रतिगत्य मया अराजकता आदौ निवारणीया" इति।

एतदनन्तरं राज्ञा राजकार्ये आसक्तिः दर्शिता। देशे स्थिताः दोषाः निवारिताः। जनानां शान्तिसुखार्थं प्रयत्नं कुर्वन् सः चिरकालं जीवितवान्।

## Programme Schedule - 2022-23

| Sr No | Month | Programme | Duration & Starting Date | Time | Day |
|---|---|---|---|---|---|
| 1 | Jan | संस्कृतधाराप्रवाह | 07/01/22 to 16/12/22 | 06:30pm to 08:00pm | Friday |
| 2 | Jan | संस्कृतभाषाशिक्षणम् | 03/01/22 to 30/03/22 | 06:30pm to 08:00pm | Monday-Wednesday Friday |
| 3 | Feb | स्तोत्रपाठः ( निश्चितस्तोत्राणि ) | 01/02/22 to 03/03/22 | 06:30pm to 08:00pm | Tuesday -Thursday |
| 4 | Feb | संस्कृतभाषाशिक्षणम् | 02/02/22 to 29/04/22 | 07:30am to 09:00am | Monday-Wednesday Friday |
| 5 | Mar | छन्दःपरिचयः | 01/03/22 to 31/03/22 | 06:30pm to 08:00pm | Tuesday -Thursday |
| 6 | Apr | संस्कृतभाषाशिक्षणम् | 04/04/22 to 29/06/22 | 06:30pm to 08:00pm | Monday-Wednesday Friday |
| 7 | May | ग्रीष्मवर्गः<br>बालसंस्कृतवर्गः ( Cl.1 to 8 )<br>मार्गदर्शनम्( व्याकरणम् )( Cl.9,10)<br>(with feedback) | 02/05/22 to 12/05/22 | 10:00am to 11:30am<br>08:00am to 09:30am | Daily<br>Daily |
| 8 | May | संस्कृतभाषाशिक्षणम् | 02/05/22 to 29/07/22 | 07:30am to 09:00am | Monday-Wednesday Friday |
| 9 | June | सन्धिः | 01/06/22 to 01/07/22 | 06:30pm to 08:00pm | Wednesday-Friday |
| 10 | June | Value Education Through Sanskrit<br>बालसंस्कृतवर्गः<br>(Class SKg to 8)<br>Online | 11/06/22 to 25/03/23 | 06:00pm to 07:30pm | Saturday |
| 11 | June | Value Education Through Sanskrit<br>बालसंस्कृतवर्गः<br>(Class SKg to 8)<br>Offline | 12/06/22 to 26/03/23 | 11:00am to 12:30pm | Sunday |
| 12 | July | संस्कृतभाषाशिक्षणम् | 04/07/22 to 30/09/22 | 06:30pm to 08:00pm | Monday-Wednesday Friday |
| 13 | July | स्तोत्रपाठः<br>( शिवपूजनम्, शिवमहिम्नः स्तोत्रं च ) | 05/07/22 to 04/08/22 | 06:30pm to 08:00pm | Tuesday -Thursday |
| 14 | Aug | स्तोत्रपाठः<br>( मातृपूजनम्, शक्रादयस्तुतिः च ) | 09/08/22 to 08/09/22 | 06:30pm to 08:00pm | Tuesday- Thursday |
| 15 | Aug | संस्कृतभाषाशिक्षणम् | 01/08/22 to 28/10/22 | 07:30am to 09:00am | Monday-Wednesday Friday |
| 16 | Sept | Diploma in Sanskrit Teaching | 01/09/22 to 30/05/23 | 06:00pm to 08:00pm | Tuesday- Thursday |
| 17 | Oct | संस्कृतभाषाशिक्षणम् | 03/10/22 to 30/12/22 | 06:30pm to 08:00pm | Monday-Wednesday Friday |
| 18 | Nov | दीपावलीवर्गः<br>बालसंस्कृतवर्गः ( Cl.1 to 8 )<br>मार्गदर्शनम् ( व्याकरणम् ) ( Cl.9,10 ) | 31/10/22 to 10/11/22 | 10:00am to 11:30am<br>08:00am to 09:30am | Daily<br>Daily |

- **For more information contact : Dr. Mihir Upadhyay Mobile: 98246 16237**

Core House, Off CG Road Ahmedabad 380 006 • www.eklavyasanskritacademy.org • E-mail: mihiresa@gmail.com

# मासवार्ता

## आयोजिता श्रीमद्भगवद्गीताव्याख्यानमाला



संस्कृतरसिकाः संस्कृतसाहित्यस्य शास्त्राणां च परिचयं प्राप्नुयुः इति विचार्य एकलव्य-संस्कृत-एकेडेमी, संस्कृतविद्याप्रतिष्ठानं चेरिटेबलट्रस्ट, अमदावाद-संस्कृत-एकेडेमी इत्येतेषां संयुक्तोपक्रमेण संस्कृत-साहित्य-रसास्वाद-व्याख्यानमालायाः आयोजनं नियमितं क्रियते। एतस्मिन् एव उपक्रमे श्रीमद्भगवद्गीता- व्याख्यानमालायाः आयोजनम् अभवत्। एतस्यां विशिष्टव्याख्यानश्रेण्यां श्रीमद्भगवद्गीतायाः अध्येतारः एकम् एकम् अध्यायं स्वीकृत्य मनोहरं व्याख्यानं प्रायच्छन्। अस्यां व्याख्यानश्रेण्यां डिसेम्बरमासस्य १ दिनाङ्के स्वामिनी श्रीविद्याप्रकाशानन्दा सरस्वती अर्जुनविषादयोगविषये, ३ दिनाङ्के ओजसी सुखटणकरः साङ्ख्ययोगविषये, ४ दिनाङ्के श्री पी.के. लहेरी कर्मयोगविषये, ८ दिनाङ्के ब्र. अनुपमा चैतन्यजी ज्ञानकर्मसन्न्यासयोगविषये, १० दिनाङ्के वैदेही अध्यारु कर्मसन्नयासयोगविषये, ११ दिनाङ्के डॉ. नीरजा गुप्ता आत्मसंयमयोगविषये, १५ दिनाङ्के डॉ. नरेन्द्रः पण्ड्या ज्ञानविज्ञानयोगविषये, १७ दिनाङ्के श्रीमकरन्दः शुक्लः अक्षरब्रह्मयोगविषये, १८ दिनाङ्के श्रीमान् अमरेन्द्रदासः राजविद्याराजगुह्ययोगविषये, २२ दिनाङ्के श्रीमती हेमा पटेलः विभूतियोगविषये, २३ दिनाङ्के डॉ. अम्बालालः प्रजापतिः विश्वरूपदर्शनयोगविषये, २५ दिनाङ्के डॉ. गौराङ्गः गान्धिः भक्तियोगविषये, २९ दिनाङ्के नेहा कृष्णकुमारः क्षेत्रक्षेत्रज्ञविभागयोगविषये, ३१ दिनाङ्के श्रीकृतेशः पटेलः गुणत्रयविभागयोगविषये, जनवरीमासस्य १ दिनाङ्के डॉ. अनीलः झा पुरुषोत्तमयोगविषये, ५ दिनाङ्के स्वामी श्रीमुदितवदनानन्दः सरस्वती दैवासुरसम्पद्विभागयोगविषये, ७ दिनाङ्के डॉ विष्णुः पण्ड्या श्रद्धात्रयविभागयोगविषये, ८ दिनाङ्के श्री भाग्येशः झा मोक्षसन्न्यासयोगविषये च श्रोतृभ्यः मार्गदर्शनं प्रायच्छन्। व्याख्यानानि श्रुत्वा संस्कृतरसिकाः सन्तुष्टाः आसन्।

## कृपया हसन्तु

शिक्षकः - (रमणं प्रति) भगवान् रामः वनवासाय कदा प्रस्थानम् अकरोत् ?

रमणः - ९.१५ वादने ।

शिक्षकः - त्वं कथं जानासि ?

रमणः - 'वनवास' इति शब्दं पृष्ठतः (विपरीतं) पठतु भवान् ।

★ ★ ★ ★ ★

शिक्षकः - (नमनम् उद्दिश्य) भोः नमन ! पृथिव्यां सर्वाधिकं गुरुत्वाकर्षणबलं कुत्र वर्तते ?

नमनः - पर्यङ्के।

शिक्षकः - (क्रोधेन) कथम् ?

नमनः - प्रातः यावदपि शीघ्रम् उत्थातुं प्रयत्नं कुर्मः पर्यङ्कः अस्मान् दृढतया कर्षति । नैव मुञ्चति ।

★ ★ ★ ★ ★

परिचारिका- (रोगिणं दृष्ट्वा) भोः वैद्यमहोदय ! एतस्य रुग्णस्य तु नेत्रयोः शस्त्रक्रिया जातास्ति । तर्हि एतस्य हस्तयोः प्लास्टरबन्धनं किमर्थं कृतम् ?

वैद्यः - अयं "वोट्सएप" "फेसबुक" इत्यनयोः प्रयोगं न कुर्यात् अतः ।

## सुभाषितम्

– संस्कृतविकिपीडियाजालस्थानात्

**अकीर्तिर्यस्य गीयेत, लोके भूतस्य कस्यचित् ।**
**पतत्येवाधमांल्लोकान् यावच्छब्दः प्रकीर्त्यते ॥**

**तात्पर्यम्** – यावत्पर्यन्तं लोके यस्य कस्यापि प्राणिविशेषस्य अपयशः (अपकीर्तिः) गीयते तावत्पर्यन्तम् अर्थात् अकीर्तिशब्दस्य सङ्कीर्तनपर्यन्तं सः नीचलोके पतितो भूत्वा तिष्ठति।

**अकीर्त्या तप्यते चेतश्चेतस्तापोऽशुभास्त्रवः ।**
**तत्तत्प्रसादाय सदा, श्रेयसे कीर्तिमर्जयेत् ॥**

**तात्पर्यम्** – अपयशसा चित्तं तप्तं भवति। चित्ततापः दुःखं जनयति। दुःखस्य कारणवशात् अशुभं वचः मुखात् निस्सरति। हृदयतापम् अमङ्गलञ्च दूरीकर्तुं कल्याणमासादयितुञ्च सर्वदा यशः प्राप्तुञ्च कीर्तिमर्जयेत्। तद्दिशि प्रयत्नशीलः भवेत् मानवः।

**अद्यापि नोज्झति हरः किल कालकूटं कूर्मो बिभर्ति धरणीं खलु पृष्ठभागे ।**
**अम्भोनिधिर्वहति दुःसहवाडवाग्निम् अङ्गीकृतं सुकृतिनः परिपालयन्ति ॥**

**तात्पर्यम्** – शिवः अद्य अपि हालाहलकूटं न त्यक्तवान् अस्ति, कूर्मः अधुनाऽपि भूमेः भारोद्वहनं कुर्वन् अस्ति, समुद्रः अधुनापि वाडवानलं वहन् अस्ति, तद्रीत्या उत्तमपुरुषाः जीवने यत् अङ्गीकुर्वन्ति तत् आन्त्यं परिपालयन्ति।

## ज्ञानसरिता

श्यामः पटेलः

**अणुशक्तिः** – आणवीयशक्तिकेन्द्रेषु अणुप्रस्फोटकेषु च अणोः विभाजनं कृत्वा शक्तिः प्रसूयते। यदा संयन्त्रैः अणोः विभाजनं भवति तदा तत्र प्रचण्डशक्तिः रश्मिविकिरणं च जायेते। सा एव अणुशक्तिः वा आणवीय-ऊर्जा इति कथ्यते। प्रत्येकं धातोः अणोः विभाजनं भवितुं शक्नोति। ततः ऊर्जा अपि उत्पन्ना भवति। अणोः विभाजने केन्द्रे स्थितस्य प्रोटोनतत्त्वस्य सङ्ख्या यावती अधिका तावती अधिका शक्तिः जायते। आधुनिक-अणुविज्ञाने अयम् एव "अणुभारः" इत्यनेन प्रसिद्धः। मृदुतत्त्वेषु अन्यतमस्य "हाइड्रोजन" इत्यस्य अणुभारसङ्ख्या एका एव अस्ति। अतः हाइड्रोजन-इत्यस्य अणोः विभाजनेन न्यूना शक्तिः उद्भवति। तथापि एतस्य प्रयोगः 'हाइड्रोजन-बोम्ब' नाम प्रस्फोटके भवति। वयं जानीमः यत् महत् शक्तिशालि प्रस्फोटकम् इदम्। किन्तु विद्युत् उत्पादयितुम् अल्पशक्तित्वात् एतस्य प्रयोगः न शक्यः। तत्र तु 'युरेनियम' इति धातोः विशेषोपयोगः। कारणं 'युरेनियम्' धातोः अणोः केन्द्रे ९२ सङ्ख्यात्मकं प्रोटोनतत्त्वं भवति। तस्य अणोः विभाजनेन अधिकां शक्तिं जनयितुं शक्नुमः। अतः आणवीय-ऊर्जायाः प्राप्त्यर्थे 'युरेनियम' धातुः एव महोपयोगी। भूगर्भतः एतं 'युरेनियम' धातुम् अशुद्धरूपेण सम्प्राप्य शुद्धीकृत्य उपयोगभेदानुसारं ततः सूक्ष्मयष्टिनिर्माणं भवति। अनन्तरं मुष्टिमात्रं 'युरेनियम' धातुं प्रयुज्य आणवीयशक्तिकेन्द्रेषु तावती ऊर्जा समुद्भवति यावती ७० टनपरिमितान् अङ्गारान् प्रज्वाल्य भवति।

आणवीयशक्तिकेन्द्रम् – atomic reactor, अणुप्रस्फोटकम् – atom bomb
रश्मिविकिरणम् – radiation, आणवीय-ऊर्जा – atomic energy

## शब्दमञ्जूषा

| | |
|---|---|
| **योजना** | scheme |
| **शास्त्रम्** | scripture |
| **अन्वेषणप्रकाशः** | search light |
| **आसनम्** | seat |
| **सचिवः** | secretary |
| **प्रवरसमितिः** | select committee |
| **स्वाभिमानः** | self-respect |
| **वरिष्ठसभा** | senate |
| **भावार्थः** | sense |
| **तिलः** | sesamum |
| **पोतः** | ship |
| **तटम्** | shore |
| **आशुलिपिः** | shorthand |
| **चातुर्यम्** | skill |
| **दास्यम्** | slavery |

## किं भवन्तः जानन्ति ?

**१ ) कति सङ्ख्यकाः मुख्यपर्वताः मताः सन्ति ?**
(क) नव (ख) सप्त (ग) एकादश (घ) दश

**२ ) कति महानद्यः सन्ति ?**
(क) चतस्रः (ख) षट् (ग) सप्त (घ) अष्ट

**३ ) कति सङ्ख्यकाः शक्तिपीठाः उक्ताः सन्ति ?**
(क) ४ (ख) ३१ (ग) ४२ (घ) ५१

**४ ) एकस्याम् अक्षौहिणीसेनायां कति रथाः भवन्ति ?**
(क) ६५,६१० (ख) ७०,३६० (ग) २१,८७० (घ) १,०९,३५०

**५ ) एकस्याम् अक्षौहिणीसेनायां कति अश्वाः भवन्ति ?**
(क) ६४,६१० (ख) ६५,६१० (ग) ६५,७१० (घ) ६५,५००

**६ ) महाभारते कति श्लोकाः सन्ति ?**
(क) प्रायः १,००,२१७ (ख) प्रायः ९०,०००
(ग) प्रायः ७०,००० (घ) प्रायः ८०,०००

**७ ) महाभारतयुद्धे कति सैनिकाः मृताः आसन् ?**
(क) १,५०,१०,३२,००० (ख) १,१०,१०,१०,०००
(ग) १,६६,००,२०,००० (घ) १,२०,३५,१५,०००

उत्तराणि – (१) ख (२) ग (३) घ (४) ग (५) ख (६) क (७) ग

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Learn Online**

## संस्कृतभाषाशिक्षणम्

**First level**

**Date :** 3/1/22 to 11/3/22
**Day :** Mon-Wed-Fri
**Time :** 7:30 pm to 9:00 pm (IST)
**Fees :** 5000/-

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Learn Online**

## संस्कृतभाषाशिक्षणम्

**First level**

**Date :** 2/2/22 to 29/4/22
**Day :** Mon-Wed-Fri
**Time :** 7:30 am to 9:00 am (IST)
**Fees :** 5000/-

**Admission Open 2022-23**

**Value Education Through Sanskrit**

## बालसंस्कृतवर्गः

**(Class SKg to 8)**
**Online / Offline**

संस्कृत-
**साम्प्रतम्**

नमस्कारः
यदि भवन्तः ''साम्प्रतम्'' मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

| | |
|---|---|
| वार्षिकं रू | – 100 |
| द्वैवार्षिकं रू | – 175 |
| त्रैवार्षिकं रू | – 250 |
| अङ्कमूल्यं रू | – 10 |

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

## स्तोत्रपाठः

## ( निश्चितस्तोत्राणि )

**Date :** 1/2/22 to 3/3/22
**Day :** Tuesday, Thursday
**Time :** 6:30 pm to 8:00 pm (IST)
**Fees :** 2500/-

➤ **Contact:** Dr. Mihir Upadhyay,
Mobile: 98246 16237

**प्रियवाचकाः**
- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006